कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 2033 विषय उपनिषद
नाव. तैत्तरीय ब्रह्मोपनिषद् (MSS)
लेखक/लिपीकार –
पृष्ठ 07 काळ – पूर्ण/अपूर्ण

M२०३३
अथतैत्तरीयब्रह्मोपानिषत्प्रारंभः

श्रीगणेशायनमः। हरिः ओम्। सहनाववतु सहनौभुनक्तु सहवीर्यं करवावहै। तेजस्विनावधीतमस्तु माविद्विषावहै। ओम् शांतिः शांतिः शांतिः। हरिः ॐ ब्रह्मविदाप्नोतिपरं तदेषाभ्युक्ता सत्यंज्ञानमनंतंब्रह्म। योवेदनिहितंगुहायांपरमेव्योमन्। सोश्नुतेसर्वान्कामान्सह। ब्रह्मणाविपश्चितेति। तस्माद्वाएतस्मादात्मनआकाशःसंभूतः आ

२ अन्नाद्रेतः। रेतसः पुरुषः।

काशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी पृथिव्याओषधयः ओषधीभ्योन्नं अन्नात्पुरुषः सवाएषपुरुषोन्नरसमयः तस्येदमेवशिरः अयंदक्षिणः पक्षः अयमुत्तरः पक्षः अयमात्मा इदंपुच्छंप्रतिष्ठा तदप्येषश्लोकोभवति १ अन्नाद्वैप्रजाःप्रजायंते याकाश्चपृथिविंश्रिताः अथोअन्नेनैवजीवंति अथैनदपियंत्यंतः अन्नंहिभूतानांज्येष्ठं तस्मात्सर्वौ

धमुच्यते। सर्वं वै तेन्नमाप्नुवंति। येन्नं ब्रह्मोपासते। अन्नं
हि भूतानां ज्येष्ठं तस्मात्सर्वौषधमुच्यते। अन्नाद्भूतानि
जायंते। जातान्यन्नेन वर्द्धंते। अद्यतेत्ति च भूतानि। तस्मा
दन्नं तदुच्यत इति तस्माद्वा एतस्मादन्नरसमयात् अ
न्योंतर आत्मा प्राणमयः तेनैष पूर्णः स वा एष पुरुष
विध एव तस्य पुरुषविधतां अन्वयं पुरुषविधः तस्य
प्राण एव शिरः व्यानो दक्षिणः पक्षः अपान उत्तरः पक्षः

२

आकाश आत्मा पृथिवी पुच्छं प्रतिष्ठा तदप्येष श्लोको भ
वति २ प्राणं देवा अनु प्राणंति मनुष्याः पशवश्च ये प्रा
णो हि भूतानामायुः तस्मात्सर्वायुषमुच्यते सर्वमेव
त आयुर्यंति ये प्राणं ब्रह्मोपासते प्राणो हि भूताना
मायुः तस्मात्सर्वायुषमुच्यत इति तस्यैष एव शारीर
आत्मा यः पूर्वस्य तस्माद्वा एतस्मात्प्राणमयात् अन्यों
तर आत्मा मनोमयः तेनैष पूर्णः स वा एष पुरुषविध
एव तस्य पुरुषविधतां अन्वयं पुरुषविधः तस्य यजुरेव
शिरः ऋग्दक्षिणः पक्षः सामोत्तरः पक्षः आदेश आ

त्मा अथर्वांगिरसः पुच्छंप्रतिष्ठा तदप्येष श्लोकोभवति ३
यतोवाचो निवर्त्तंते अप्राप्यमनसासह आनंदंब्रह्मणो
विद्वान् न बिभेतिकदाचनेति तस्यैषएवशारीरआत्मा
यःपूर्वस्य तस्माद्वाएतस्मान्मनोमयात् अन्योंतरआ
त्माविज्ञानमयः तेनैषपूर्णः सवाएषपुरुषविधएव त
स्यपुरुषविधतां अन्वयंपुरुषविधः तस्यश्रद्धैवशिरः
ऋतंदक्षिणः पक्षः सत्यमुत्तरःपक्षः योगआत्मा महः
पुच्छंप्रतिष्ठा तदप्येषश्लोकोभवति ४ विज्ञानंयज्ञं
तनुते कर्माणितनुतेपिच विज्ञानंदेवाः सर्वे ब्रह्मज्ये

ष्ठमुपासते विज्ञानंब्रह्मचेद्वेद तस्माच्चेन्नप्रमाद्यति शरी
रेपाप्मनोहित्वा सर्वान्कामान्समश्नुतइति तस्यैषएव
शारीरआत्मा यःपूर्वस्य तस्माद्वाएतस्माद्विज्ञानम
यात् अन्योंतरआत्मानंदमयः तेनैषपूर्णः सवाएष
पुरुषविधएव तस्यपुरुषविधतां अन्वयंपुरुषविधः
तस्यप्रियमेवशिरः मोदोदक्षिणःपक्षः प्रमोदउत्तरःपक्षः
आनंदआत्मा ब्रह्मपुच्छंप्रतिष्ठा तदप्येषश्लोकोभव
ति ५ असन्नेवसभवति असद्ब्रह्मेतिवेदचेत् अस्ति

ब्रह्मेति चेद्वेद। संतमेनं ततो विदुरिति। तस्यैष एव शारी
र आत्मा। यः पूर्वस्य। अथातोनुप्रश्नाः। उताविद्वानमुंलो
कं प्रेत्य। कश्चन गच्छती३। आहो विद्वानमुंलोकं प्रेत्य। क
श्चित्समश्नुता३ उ। सोकामयत। बहुस्यां प्रजायेयेति।
स तपोतप्यत। स तपस्तप्त्वा। इद ं सर्वमसृजत। यदिदं किं
च। तत्सृष्ट्वा। तदेवानुप्राविशत्। तदनुप्रविश्य। सच्च त्य
च्चाभवत्। निरुक्तं चानिरुक्तं च। निलयनं चानिलयनं
च। विज्ञानं चाविज्ञानं च। सत्यं चानृतं च सत्यमभवत्।

४

यदिदं किंच। तत्सत्यमित्याचक्षते। तदप्येष श्लोको भवति
६। असद्वा इदमग्र आसीत्। ततो वै सदजायत। तदात्मान
ं स्वयमकुरुत। तस्मात्तत्सुकृतमुच्यत इति। यद्वै तत्सु
कृतं। रसो वै सः। रस ं ह्येवायं लब्ध्वानंदी भवति। को ह्येवा
न्यात्कः प्राण्यात्। यदेष आकाश आनंदो न स्यात्। एष
ह्येवानंदयाति। यदा ह्येवैष एतस्मिन्नदृश्येनात्म्येनिरुक्ते नि
लयनेभयं प्रतिष्ठां विंदते। अथ सोभयं गतो भवति। यदा ह्ये
वैष एतस्मिन्नुदरमंतरं कुरुते। अथ तस्य भयं भवति। तत्त्वेव भ
यं विदुषो मन्वानस्य। तदप्येष श्लोको भवति। ७। भीषा

स्माद्वातःपवते भीषोदेति सूर्यः भीषास्मादग्निश्चेंद्रश्च मृ
त्युर्धावतिपंचमइति सेषानंदस्यमीमांसाभवति युवास्या
त्साधुयुवाध्यायकः आशिष्ठोदृढिष्ठोबलिष्ठः तस्येयंपृ
थिवीसर्वावित्तस्यपूर्णास्यात् सएको मानुषआनंदः ते
येशतंमानुषाआनंदाः १ सएकोमनुष्यगंधर्वाणामानं
दः श्रोत्रियस्यचाकामहतस्य तेयेशतंमनुष्यगंधर्वाणा
मानंदाः सएकोदेवगंधर्वाणामानंदः श्रोत्रियस्यचाकामह
तस्य तेयेशतंदेवगंधर्वाणामानंदाः सएकः पितृणांचि
रलोकलोकानामानंदः श्रोत्रियस्यचाकामहतस्य तेयेश

तंपितृणांचिरलोकलोकानामानंदाः स एक आजानजानां
देवानामानंदः २ श्रोत्रियस्यचाकामहतस्य तेयेशतमाजा
नजानांदेवानामानंदाः सएकः कर्मदेवानांदेवानामानंदः
येकर्मणादेवानपियंति श्रोत्रियस्यचाकामहतस्य तेयेश
तंकर्मदेवानांदेवानामानंदाः स एकोदेवानामानंदः श्रोत्रि
यस्यचाकामहतस्य तेयेशतंदेवानामानंदाः सएक इंद्रस्या
नंदः ३ श्रोत्रियस्यचाकामहतस्य तेयेशतमिंद्रस्यानंदाः
सएकोबृहस्पतेरानंदः श्रोत्रियस्यचाकामहतस्य तेयेशत
बृहस्पतेरानंदाः सएकः प्रजापतेरानंदः श्रोत्रियस्यचाकामह

तस्य ते ये शतं प्रजापतेरानंदाः । स एको ब्रह्मण आनंदः । श्रोत्रि
यस्य चाकामहतस्य ॥ ७ ॥ स यश्चायं पुरुषे । यश्चासावादित्ये ।
स एकः । स य एवं वित् । अस्माल्लोकात्प्रेत्य । एतमन्नमयमा
त्मानमुपसंक्रामति । एतं प्राणमयमात्मानमुपसंक्राम
ति । एतं मनोमयमात्मानमुपसंक्रामति । एतं विज्ञानमय
मात्मानमुसंक्रामति । एतमानंदमयमात्मानमुपसंक्रा
मति । तदप्येष श्लोको भवति ॥ ८ ॥ यतो वाचो निवर्त्तन्ते । अप्रा
प्य मनसा सह । आनंदं ब्रह्मणो विद्वान् । न बिभेति कुतश्च
नेति । एतꣳ ह वाव न तपति । किमहꣳ साधु नाकरवं । किमहं

प ६

पापमकरवमिति । स य एवं विद्वानेते आत्मानꣳ स्पृणुते ।
उभे ह्येवैष एते आत्मानꣳ स्पृणुते । य एवं वेद । इत्युपनि
षत् ॥ ९ ॥ ब्रह्मविदिदमयमिदमेकविꣳशति रन्नात्प्राणो व्या
नोपान आकाशः पृथिवी पुच्छꣳ षड्विꣳशतिः प्राणं य
जुरृक्सामादेशो थर्वांगिरसः पुच्छं द्वाविꣳशतिर्यत
श्रध्धेतꣳ सत्यं योगो महोष्टादश विज्ञानं प्रियं मोदः प्र
मोद आनंदो ब्रह्म पुच्छं द्वाविꣳशतिरसन्नेवाथाष्टाविꣳ
शतिरसत्षोडश भीषास्मादेकपंचाशद्यतः कुतश्चनै
कादश ॥ ओम् सहनाववतु सहनौ भुनक्तौ सहवीर्यंक

र्वावहै।तेजस्विनावधीतमस्तु माविद्विषावहै। ओम् ।शां
तिः।शांतिः।शांतिः।।

८